ISSN: 2456–4397 RNI No.UPBIL/2016/68067 Vol-6* Issue-2* May- 2021
Anthology : The Research

# संस्कृतशिक्षणे नवप्रवृत्तयः

# New Trends in Sanskrit Teaching

Paper Submission: 05/05/2021, Date of Acceptance: 21/05/2021, Date of Publication: 23/05/2021

**सारांशः**

श्री एन.गोपालस्वामिनः अध्यक्षतायां भारतशासनस्य मानवसंसाधनविकास-मन्त्रालयेन (साम्प्रतं शिक्षामन्त्रालयः इत्यनेन) संस्कृतभाषायाः विकासार्थं स्वीकृतानामुद्देश्यानां विवेचनं कृत्वा संस्कृतशिक्षायाः वर्तमानस्थितिं प्रतिपादयता संस्कृतस्य विकासाय “अष्टादशी” इति योजनायाम् अन्तर्भूतपरियोजनानां विवरणम् । संस्कृतभाषायां साम्प्रतं प्रवर्तमानानां नवप्रवृत्तीनां च विवेचनम् । संस्कृतभाषायाः विषये साहित्येषु वेदेषु प्रतिपादितस्य वैशिष्ट्यस्य प्रतिपादनम् ।

Under the chairmanship of CN Gopalaswami, the Ministry of Human Resource Development(now Education Ministry)Government of India, by explaining the objectives approved for the development of Sanskrit language, rendering the present status of Sanskrit, “Ashtadashi “scheme for the development of Sanskrit, the details of included projects in this scheme .Discussion of the new trends promoted at present in Sanskrit language .Rendering of the features described in the Vedas and literature about the Sanskrit language.



**कुलदीपसिंहः**
सहायकाचार्यः
शिक्षाशास्त्रम्
ज.रा.रा.संस्कृतविश्वविद्यालयः,
जयपुरम्, राजस्थानम्

**मुख्यशब्दाः (Keywords)**

श्रव्यपुस्तकानि (Audio Book), ओ.सी.आर (Optical Character Reader), संस्कृतविश्वकोशः (Sanskrit Wikipidea), अष्टादशी परियोजना (18 Projects), संस्कृतशिक्षा (Sanskrit Education), आभासीयपट्टः (Virtual Board).

**उद्देश्यानि (Objectives)**

1. संस्कृतभाषायाः विकासार्थं यथासमयं प्रशासनेन विभिन्नाः योजनाः प्रचाल्यन्ते, तासां योजनानां विषये जागरूकता ।
2. “अष्टादशी” इति विशिष्टपरियोजनायाः परिचयप्रदानम् ।
3. साम्प्रतं संस्कृतभाषायां प्रवर्तमानानां नवप्रवृत्तीनां च (New Trends) विवेचनम्।

**प्रस्तावना**

व्याकरणशास्त्रे शिक्षा इति शब्दः शिक्ष् धातोः निष्पद्यते यस्यार्थो भवति विद्योपादानमिति । शक्लृ शक्तौ, शक् मर्षणेच्छाविशेषार्थे इत्याभ्यां धातुभ्यामपि शिक्षा शब्दस्य रूपं जायते । ऋग्वेदे शिक्षणं शिक्षा इति वर्णितम् उक्तञ्च-

**वयो न ये श्रेणीः पप्तुरोजसान्तान्दिवो बृहतः सानुनस्परि ।**[1]

मानवाः शिक्षायुक्ताः भूत्वा राष्ट्रस्योन्नतये प्रयत्नान् कुर्वन्त्विति ऋग्वेदे वर्णितम्-

**ते अज्येष्ठा अकनिष्ठास उद्भिदोऽमध्यमासो महसा वि वावृधुः ॥**[2]

सर्वभूतेषु यया एकीभावमीक्षते सैव शिक्षा इति गीतायां वर्णितम् । ईशोपनिषद्यपि उच्यते-

**अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ।**[3]

अज्ञानात् ज्ञानं प्रति प्रवर्धनमिति शिक्षायाः लक्ष्यम् । प्राचीनकालादेव भारतीयपरम्परायां संस्कृतस्य गौरवास्पदं वर्तते । संस्कृतं प्रतिक्षणं मानवहृदयं स्पृशति, प्रचोदयति च कार्याणि प्रति।

सर्वे जानन्ति यत् गुरुकुलानि संस्कृतशिक्षणस्य किं वा सर्वेषां विषयाणामध्यापनस्य केन्द्राण्यासन् । साम्प्रतमपि कतिचन प्रवर्तन्ते यत्र वेदादिपारम्परिकशास्त्राणि पाठ्यन्ते । कालस्य परिवर्तनानुगुणं शिक्षणकेन्द्राण्यपि परिवर्तितानि । शिक्षणकेन्द्रैस्सह शिक्षणविधयश्चापि परिवर्तिताः। इदमत्रावश्यमवधेयं यत् प्राचीनविधिभिस्साकं नूतनप्रविधयः अपि पाठने उपयुज्यन्ते। शिक्षणयुक्तयश्चापि प्रयुज्यन्ते । परं परिवर्तितेऽस्मिन् समये संस्कृतशिक्षणाय केचन नवीनविधयः काश्चन नवीनप्रवृत्तयश्च प्रवर्धन्ते । तेषामपि प्रचुरतया प्रयोगः स्यादिति कोविदामभिमतम् ।

भारतशासनस्य मानवसंसाधनविकासमन्त्रालयेन (साम्प्रतं शिक्षामन्त्रालयेन) 18 नवम्बर, 2015 तमेऽहनि श्री एन्. गोपालस्वामिनः अध्यक्षतायां संस्कृतभाषायाः विकासार्थम् एका समितिः घटिता । अस्याः समितेः वेदविद्यायाः विकासार्थं प्रचलितानां योजनानां समाकलनं परामर्शनञ्चेति

प्रथममुद्देश्यम्, प्रारम्भिक-माध्यमिकोच्चस्तरेभ्यः संस्कृतशिक्षणाय नाम गुणात्मकपरिवर्धनाय परामर्शनमिति द्वितीयम् उद्देश्यम् । तदारभ्य भविष्ये दशभ्य: वर्षेभ्यः संस्कृतस्य विकासाय कार्ययोजनायाः निर्माणमिति चतुर्थमुद्देश्यम्। आधुनिकविषयैस्साकं संस्कृतस्याध्ययनं भवेदिति पञ्चममुद्देश्यम् ।

जगति विद्यमानासु भाषासु कस्या: अपि भाषायाः विकासार्थं प्रमुखतया पञ्च अपेक्षाः भवन्ति – ताश्च यथा 1. वक्ता, 2. अनुदेशः, 3. समकालिकसाहित्यमाश्रित्य ग्रन्थानां निर्माणम्, 4. प्रविधेः प्रयोगः, 5. संरक्षणम् । वस्तुतः कस्याः अपि भाषायाः जीवनं तत्प्रयोगे एव समाश्रितं भवति यदि तस्यां भाषायां सम्प्रेषणं वर्तते तर्हि सा जीवितभाषा । अर्थात् संस्कृतशिक्षणं संस्कृतमाध्यमेनैव भवेदिति । संस्कृतमाध्यमेन सम्प्रेषणाय शिक्षकाणां दृढेच्छाशक्तिरेवापेक्षते । शासनन्तु केवलं तन्निमित्तं नियमनिर्धारणमेव कर्तुमर्हति । तस्य क्रियान्वयनं तु अस्माकमेव दायित्त्वम्।

जीवनस्य प्रत्येकं क्षेत्रे संस्कृतसाहित्यस्य दृष्टिर्वर्तते । साम्प्रतं संस्कृतस्य महत्यावश्यकता परिलक्ष्यते । प्राचीनार्वाचीनयोः मिथः सम्बन्धकल्पनाय प्राचीनग्रन्थेषु सन्निहितस्य ज्ञानस्य प्रकाशनाय नवाचाराणां नवमार्गान्वेषणाय च संस्कृतं कनिष्ठिकाधिष्ठितम् ।

**संस्कृतशिक्षायाः वर्तमानस्थिति**

देशस्य विभिन्नेषु राज्येषु प्रथमकक्षायाः आरभ्य संस्कृतं वैकल्पिकभाषारूपेण पाठ्यते। केरलराज्ये प्रथमकक्षातः संस्कृतं पाठ्यते । उत्तराखण्डराज्ये तृतीयकक्षातः संस्कृतं पाठ्यते । अधिकांशराज्येषु त्रिभाषासूत्रमनुसृत्य षष्ठीकक्षातः दशमकक्षापर्यन्तं द्वितीयवैकल्पिकभाषारूपेण संस्कृतम् अध्यापते । साम्प्रतं देशे आहत्य पञ्चकोट्यधिकजनाः संस्कृतमधीयानाः वर्तन्ते । विद्यालयस्तरे पञ्चसहस्राधिकपारम्परिकपाठशालाः वर्तन्ते । सहस्राधिकवेदपाठशालाः वर्तन्ते । अष्टसु राज्येषु संस्कृतनिदेशालयास्सन्ति । विंशत्युत्तरशतं सामान्यविश्वविद्यालयाः स्नातकस्तरे स्नातकोत्तरस्तरे च संस्कृतं पाठयन्ति। अष्टादशसंस्कृतविश्वविद्यालयाः पारम्परिकशास्त्रीयविषयाणामध्यापनं कारयन्ति । एतेभ्यः विश्वविद्यालयैः सम्बद्धा सहस्राधिकाः पारम्परिकमहाविद्यालयाः पारम्परिकशास्त्राणि अध्यापयन्ति । यत्र प्रायशः द्वादशलक्षाधिकाः छात्राः पठन्तस्सन्ति । दश संस्कृताकादम्यः, षोडश प्राच्यानुसन्धानसंस्थानानि (ओरिएंटल रिसर्च इंस्टीट्यूट) वर्तन्ते । षष्ट्यधिकसंस्कृतपत्रिकाः निरन्तरतया प्रकाशिताः भवन्ति । शताधिकानि अशासकीयसङ्घटनानि च कार्यरतानि सन्ति ।

उच्चमाध्यमिकस्तरे सामान्यतया कलावर्गं विहाय वाणिज्य-विज्ञानादिवर्गेषु संस्कृतस्य विकल्पं छात्रेभ्यः कतिचन राज्यानि एव ददति। इयमेव स्थितिः स्नातक-स्नातकोत्तरयोरपि जायमाना अस्ति । इदमेव संस्कृतविज्ञानयोर्मिथः असम्बद्धतायाः कारणमपि वर्तते । सङ्गणकशिक्षा, पर्यावरणं, विज्ञानं, कृषिविज्ञानं, गणितमित्यादिभिः विषयैस्साकं संस्कृतं विकल्पत्वेन प्रस्तूयते । आंग्लशासनेऽपि संस्कृताध्यापकानां वेतनम् इतरविषयाणामध्यापकानामपेक्षया अर्द्धमेवासीत् । फलतः संस्कृतं प्रति प्रतिभावतां छात्राणाम् औदासीन्यं दृश्यते।

अतः समयानुगुणं संस्कृतस्नातकेभ्यः आजीविकायाः नवीनक्षेत्राणामन्वेषणपुरस्सरम् उचितवेतनस्यापि निर्धारणमनिवार्यम् । नीतिनिर्धारकाः ये वर्तन्ते तैः इदमपि अवधेयं यत् विद्यालयीयशिक्षा एव उच्चशिक्षायै पारम्परिकशिक्षायै च छात्राणामापूर्तिं करोति परं संस्कृतशिक्षायाः प्रथमसोपानभूता विद्यालयीयशिक्षा एव सर्वाधिकोपेक्षिता । आंग्लशासकाः भारते आंग्लशिक्षां प्रारब्धवन्तः। अद्यत्वे अपि संस्कृतस्य प्राथमिकमुद्देश्यं केवलं संस्कृतसाहित्यस्यावगमनमेवास्ति । केवलं भाषान्तरेण अनुवादं कर्तुमेव संस्कृतशिक्षायाः लक्ष्यम् । फलतश्च भाषाशिक्षणस्य पाश्चात्यपद्धतिः व्याकरणानुवादपद्धतिः इति संस्कृतशिक्षणाय नियोजिता ।

यद्यपि इयं शिक्षणपद्धतिः संस्कृतेतरभाषासु साम्प्रतं नोपयुज्यते । परम् अनया पद्धत्या सहस्राधिकानि संस्कृतपुस्तकानि अनूदितानि फलतश्च संस्कृतं प्रति जागरूकता संवर्धिता । अत्रापि इदमेव कष्टं यत् लोकाः अनुवादं पठन्ति, न तु संस्कृतम् । संस्कृतेतरभाषासु साहित्ये अभिवृद्धिर्जायमाना वर्तते, परं संस्कृते न । साम्प्रतं सर्वेषु स्तरेषु पञ्चलक्षसंस्कृताध्यापकाः वर्तन्ते, तेषु अधिकांशतः व्याकरणानुवादविधिना सम्भूताः इति कारणतः बहवः ते संस्कृतेन सम्भाषणे अक्षमाः। अनेके शिक्षकाः संस्कृतस्य कक्षासु संस्कृतभाषायाः प्रयोगं न कुर्वन्ति, संस्कृतविभागास्सन्तोऽपि संस्कृतभाषायां नास्ति तत्र सञ्चारः। एवमेव संस्कृतविद्यालयेषु संस्कृतवातावरणमेव नास्ति ।

संसारे यावत्यः भाषाः वर्तन्ते तासु भाषासु एव प्रश्नपत्राणि भवन्ति, उत्तराण्यपि तस्यामेव भाषायां देयानि भवन्ति । परं केवलं संस्कृतभाषा एव अपवादभूता । अतः संस्कृतमाध्यमेनैव कक्षा-कक्षेषु सम्प्रेषणं स्यात् । प्रश्नपत्राणि तेषामुत्तराण्यपि संस्कृतभाषयैव भवेयुः। विद्यालयस्तरे संस्कृतं प्रति छात्राणामाकर्षणाय समुचितवातावरणस्य निर्माणं शिक्षकाणामुत्साहश्च नितरामपेक्षते । संस्कृतं विज्ञानस्य, प्रद्यौगिक्याः, गणितस्य, अर्थशास्त्रस्य च भाषा आसीत् । सौभाग्याद् संस्कृतप्रयोगशाला आसीत् परं दुर्भाग्यात् इदं पुरामन्दिरमभवत् । महर्षिणा अरविन्देन उक्तम्- वेदाः चिन्तनस्य विषयास्सन्ति परं संस्कृतसाहित्य शोधस्य महत्यावश्यकता प्राचीनाधिनिकयोः परस्परं समन्वयस्यावश्यकता वर्तते । उक्तञ्च -

**पुराणमित्येव न साधु सर्वं च न चापि काव्यं नवमित्यवद्यम् ।**
**सन्तः परीक्ष्यान्यतरद्भजन्ते मूढः परप्रत्ययनेयबुद्धिः॥**[4]

महात्मगान्धिसदृशाः महन्तः जनाः स्वकौटुम्बजनानपि संस्कृतभाषया व्यवहर्तुं प्रेरितवन्तः। डॉ. भीमराव अम्बेडकरमहोदयस्तु संस्कृतभाषायां वार्तालापस्य सारल्यमपि प्रकटयामास । संविधाने आधिकारिकभाषात्वेन संस्कृतस्य समर्थनमपि अकरोत् ।

**संस्कृतस्य विकासाय प्रस्तावितयोजना**

1. स्वातन्त्र्यात् पूर्वं स्थापितानां महाविद्यालयानां नवीकरणम् ।
2. पारम्परिकपाठशालाभ्यः आर्थिकानुदानेन सह भौतिकसंसाधनानां प्रबन्धनम् ।
3. संस्कृतशोधसंस्थानानां प्राच्यानुसन्धानकेन्द्राणाञ्च डिजिटल-परिवर्तनम्।
4. शास्त्रसंरक्षणयोजना- अनया योजनया शास्त्रशिक्षणप्रणाल्याम् अपेक्षितपरिवर्तनानि विधाय न्यूनातिन्यूनं त्रिभ्यः वर्षेभ्यः शास्त्राणामध्यापनं तदनन्तरञ्च उपाधिप्रदानम् ।

तत्र एन्. गोपालस्वामिमहोदयस्य आध्यक्ष्ये रचिता एषा समितिः संस्कृतस्य विकासाय **अष्टादशी** इति नाम्ना विशिष्टपरियोजनायाः प्रावधानं विहितवती। आसां योजनानां नामानि इत्थं सन्ति-

1. ज्ञानात्मकसाहित्यस्य अनुवादकार्यपरियोजना।
2. पाण्डुलिपीनां सम्पादनस्य प्रकाशनस्य च योजना- चतुर्दशाधिकलिपिसु लिखितानां पञ्चचत्वारिंशल्लक्षपाण्डुलिपीनां सम्पादनं प्रकाशनञ्च।
3. डिजीटल-ऑनलाइन संसाधनपरियोजना- संस्कृतकार्याणां डिजिटल-प्रस्तुतीकरणम्।
4. ग्रीष्मकालिकयोजना- अवकाशे विभिन्नपाठ्यक्रमाणां सञ्चालनम्।
5. समकालिकसाहित्यपरियोजना- समसामयिकविषयेषु लेखनाय विद्वद्भ्य: प्रोत्साहनम्।
6. सान्ध्यकालिकपरियोजना- संस्कृतपिपाठिषूणां कृते पृथक्कक्षाणां सञ्चालनम्।
7. प्रौद्योगिकी-अनुकूलनपरियोजना- संस्कृतभाषायै एप्स, OCR, सॉफ्टवेयर, फॉन्टस्, आभासी कक्षा इत्यादीनां मूलभूतसंसाधनानां प्रबन्धनम्।
8. सङ्गणकशिक्षापरियोजना।
9. द्विवार्षिकसंस्कृतपुस्तकमेलापरियोजना।
10. संस्कृतस्य जनप्रसारयोजना (अल्पकालिकपाठ्यक्रमाणां माध्यमेन)
11. शब्दशालापरियोजना- आधुनिकशब्दानां संस्कृतानुवादाय इयं परियोजना वर्तते।
12. दुर्लभग्रन्थानां पुनर्मुद्रणपरियोजना।
13. आवासीयप्रशिक्षणकार्यक्रमाः।
14. आधुनिकविषयैस्साकं संस्कृतस्यैकीकरणपरियोजना।
15. प्रशिशिक्षुता (Internship) -परियोजनायै प्रोत्साहनम्- IIT, NIIT, IISER, IIS इत्यादिषु प्रौद्योगिकीमहाविद्यालयेषु अधीयानेभ्यः छात्रेभ्यः संस्कृतसंस्थानेषु, संस्कृतमहाविद्यालयेषु च प्रशिशिक्षुतायै प्रोत्साहनम्।
16. बालसाहित्यपरियोजना।
17. संस्कृतमाध्यमेन योगपरियोजना।
18. संस्कृतमाध्यमेन आयुर्वेदपरियोजना।

संस्कृतभाषायाः विकासाय अन्यभाषासु यथा नवप्रवृत्तयः प्रवर्तन्ते तथैव संस्कृतभाषायामपि काश्चन नवप्रवृत्तयः (New Trends) परिलक्ष्यन्ते। यथा-

1. विकिपीडिया- स्वतन्त्र: विश्वज्ञानकोष: इति नामान्तरं वर्तते। अत्र प्रायः सर्वेषां विषयाणां न्यूनाधिकं वर्णनं प्राप्यते।
2. हिन्दीचलच्चित्रगीतानां संस्कृतानुवादः- प्रसिद्धानां चलच्चित्रगीतानां संस्कृतानुवादेन संस्कृतभाषा व्यवहारयोग्यभाषारूपेण ज्ञायते।
3. ई-ग्रन्थाः- चित्ररूपेणरक्षितग्रन्थाः वर्तन्ते। तत्र केचन OCR (ऑप्टिकल करेक्टर रीडर) रूपेण उपलभ्यन्ते।
4. संस्कृतभाषायां लघुचलच्चित्राणि वर्तन्ते इतोऽपि केन्द्रियसंस्कृतविश्वविद्यालयेन त्रिशतकाधिकानि लघुचलच्चित्राणि निर्मितानि।
5. भाषाप्रदर्शिनी।
6. सचित्रपुस्तकप्रदर्शनम्।
7. शब्दकोषाः।
8. श्रव्यपुस्तकानि (Audio Books)।
9. संस्कृतभाषया प्रसङ्गेतरव्यङ्ग्यचित्रकल्पनम् (Memes in Sanskrit)।
10. संस्कृतवाटिका, नक्षत्रवाटिका, कालिदासवीथिका इत्यादिरूपेण परिसरनिर्माणम्।
11. भाषापरिष्कारमृदूपागमः (Language Correction Software)
12. ई-संस्कृतपत्रिकाः।
13. ई-पुस्तकालयाः।
14. आभासीयपट्टाः (Virtual Boards)
15. राष्ट्रियम् अन्ताराष्ट्रियञ्च संस्कृतसम्मेलनम्।
16. संस्कृतवार्ताः (दूरदर्शनेन, आकाशवाण्या च)
17. संस्कृतचलच्चित्रम्।
18. दूरदर्शने उपनिषद्गंगा, महाभारतम्, रामायणम्, चाणक्यनीतिः, विष्णुपुराणम् इत्यादीनां संस्कृतनिष्ठनाटकानां प्रसारणम्।

इत्यनेन प्रकारेण संस्कृतभाषायाः विकासयात्रामभिलक्ष्य अधुना यावत् ये नवीनोपागमाः योजनाश्च नव्यप्रवृत्तिरूपेण प्रतिष्ठितास्सन्ति, तद्विषये दिङ्मात्रेणोपस्थापितम्।

**सन्दर्भाः**


1. *उपाध्यायः, बलदेवः "संस्कृत वाङ्मय का बृहद् इतिहास" उत्तरप्रदेशसंस्कृतसंस्थानम्, लखनऊ उत्तरप्रदेशः।*
2. *आप्टे, वामनशिवरामः "संस्कृत हिन्दी कोश" मोतीलाल बनारसी दास, वाराणसी।*
3. *त्रिपाठी, रामसागरः "संस्कृत साहित्य का इतिहास" चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली।*
4. *www.sanskrit.nic.in*
5. *www.wikipedia.org*
6. *www.india.gov.in*
7. *www.constitutionofindia.net*
8. *www.omniglot.com*
9. *www.britannica.com*
10. *www.sanskritbharati.in*


**अंत टिप्पणी:**

1. *ऋग्वेदः, 5/59/7*
2. *ऋग्वेदः, 5/59/6*
3. *ईशोपनिषद् 11*
4. *मालविकाग्निमित्रम्, 2*